केंद्रीय विद्यालय संगठन लखनऊ संभाग
प्री बोर्ड परीक्षा सत्र **2025-26(Set-2)**
कक्षा- **10**
विषय- संस्कृत **(119)**

समयः- **3** होरा | पूर्णांकः-**80**

सामान्यनिर्देशाः -
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
प्रश्नपत्रस्वरूपम् -

| | | |
|---|---|---|
| 'क' भागः | : अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः | : रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' भागः | : अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' भागः | : पठितावबोधनम् | 30 अङ्काः |

## खंड "क" अपठित अवबोधनम्

| | | |
|---|---|---|
| **1.** | अधोलिखितम् गद्यांशम् पठित्वाप्रदत्त प्रश्नान् उत्तरत- | **10** |
| | आधारः पुरुषार्थः एव! अस्य अभावेन नरः सुख-समृद्धिम् आप्तुम् असमर्थः भवति यशः च न प्राप्नोति । यथा-यथा नरः पुरुषार्थम् अचिनोत् तथा-तथा तेन सफलता प्राप्ता। पुरुषार्थिनः एव संसारे विलक्षण-प्रतिभाम् अर्जितवन्तः। अनेन एवम् एवरेष्टशिखरम् अजयत् अन्तरिक्ष च अगच्छत्। देशसेवया समाजसेवया च पुरुषार्थिभिः उल्लेखनीयानि कार्याणि कृतानि। अस्माकम् इतिहासे तेषां गौरवगानं विद्यते। आपातकाले येषां मनांसि विचलितानि न भवन्ति, ते एव जीवने सफलतां प्राप्नुवन्ति। पुरुषार्थिनाम् कृते तु पुरुषार्थ एव उपासना अस्ति। यः जनः स्वजीवने सफलता प्राप्तुम् इच्छति सः पुरुषार्थम् अवश्यमेव कुर्यात् । पुरुषार्थस्य अभावे जनः सफलताप्राप्तं न कर्तुं शक्यते।<br><br>(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)<br>(i) पुरुषार्थस्य अभावेन किम् आप्तुम् असमर्थः?<br>(ii) अनेन जनेन किम् अजयत्?<br>(iii) पुरुषार्थेन जनः कुत्र अगच्छत्?<br><br>(आ) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)<br>(i) पुरुषार्थिभिः केन उल्लेखनीयानि कार्याणि कृतानि?<br>(ii) पुरुषार्थिनां कृते कुत्र गौरवगानं विद्यते?<br>(iii) जीवने के सफलता प्राप्नुवन्ति?<br><br>(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।<br>(द्वित्रिशब्दात्मक-वाक्यम्) | 1×2=2<br><br>2×2=4 |

| | | |
|---|---|---|
| | (ई) यथानिर्देशम् उत्तरत। (केवलं प्रश्नत्रयम्)<br><br>(i) 'भवति' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?<br>(क) नरः<br>(ख) असमर्थ:<br>(ग) यशः<br>(घ) आधारः<br><br>(ii) 'विफलता' इति पदस्य गद्यांशे किं विलोमपदं प्रयुक्तम्?<br>(क) यथा<br>(ख) तथा<br>(ग) सफलता<br>(घ) कठिनता<br><br>(iii) 'मानवः' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?<br>(क) नरः<br>(ख) पुरुषार्थी<br>(ग) देशसेवा<br>(घ) जनः<br><br>(iv) 'उल्लेखनीयानि कार्याणि' इत्यत्र किं विशेषणपदं प्रयुक्तम्?<br>(क) उल्लेखनीयानि<br>(ख) कार्याणि<br>(ग) कृतानि<br>(घ) विभिन्नानि | 1x1=1<br><br>**1×3=3** |
| रवण्ड**: – 'रव' (**रचनात्मक-कार्यम्**)**<br>**(**अंक **: 15)** | | |
| **2** | विदेश भ्रमणं प्रति पितरं लिखितम् अध: पत्रं मञ्जूषापद सहायतया पूरयित्वा पुनः लिखत।<br><br>वाशिंगटन, अमेरिकातः<br>दिनांक…………..<br>आदरणीय पितृपादाः।<br>(i)……..नमोनमः।<br><br>वयमत्र सर्वे (ii)….. भवान् अपि कुशली भविष्यसि इति आशा। जूनमासस्य (iii) ……….. तिथौ अहम् (iv)…… सह विमानेन (v)….. अगच्छम्। आवाम् अमेरिका देशे 'लेवीपीयर' मिलेनियम पार्ड, न्याग्रा फाल्स, न्यू जर्सी, वाशिंगटन इत्यादीनि (vi)……. च अपश्याव। आवाम् (vii)…… बसयानेन | 1/2x10=5 |

| | | |
|---|---|---|
| | च यात्राम् कुर्वः। जनाः अत्र स्वच्छतां प्रति अतीव (viii)….. सन्ति। राजमार्गे ताम्बूलस्य अन्या मलिनता वा कुत्रापि न दृश्यते। जनाः अवकरम् (ix)…… प्रति निष्ठाभावानाम् उत्पादयितुं प्रयतिस्ये-इति मम निश्चयः। गृहे सर्वेभ्यः मम नमस्काराः।<br><br>(x)………..<br>सौमित्र:<br><br>(मञ्जूषा-अवकरपात्रे, कुशलिनः, सादरं, सुपुत्रः, जागरूकाः, स्वमित्रेण, रेलयानेन, अमेरिका-देशम्, दर्शनीय स्थलानि, एकादश्यां) | |
| **3** | चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-<br><br><br><br>मञ्जूषाः**-** मञ्जूषा- सागरतटस्य, नारिकेलवृक्षौ, नौकाः, जलपोताः, सागरे, विशालः, तरंगयति, नौकया, जनाः, मत्स्याखेटे, वहन्ति, शुक्तयः, शंखाः, मौक्तिकादयः, वस्तूनि प्राप्यन्ते ।<br><br>अथवा<br><br>अस्माकं विद्यालयः**"** इति विषयम् अधिक**.** त्य संस्कृतभाषायाम् अनुच्छेदं लिखत । सहायतार्थं पदानि मञ्जूषायां दत्तानि सन्ति ।<br><br>मञ्जूषा-छात्राः, विशालभवनं, योग्यम्, क्रीडाक्षेत्रे, परिश्रमेण, पठन्ति, प्रयोगशाला, पुस्तकालयः, उद्यानम्, पाठयन्ति, प्रातः, अष्टवादने, संस्कृतम्, प्रधानाचार्यः उत्सवः, अपि, च। | **1x5=5** |
| **4** | मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत -<br><br>पितामही वेदभारती देव्याः तस्याः पौत्र्या वेदिकया सह आर्य समाज विषये भूतं वार्तालापं मञ्जूषायाः सहायतया पूरयतु भवान्<br><br>वेदिका -(i)………………………………………………………………… | **1x5=5** |

पितामही- पुत्रि ! अधुना अहं रविवारस्य सत्संगाय आर्य समाज मंदिरं गच्छामि ।
बेदिका- (ii).......................................................................................
पितामही- पुत्रि, तत्र प्रथमं यज्ञः भवति ततः च आध्यात्मिकं वेदाधारितं प्रवचनं भवति ।
वेदिका- (iii).............................................................................................
पितामही-तत्र सत्संगी स्त्री-पुरुषाः एव भजनं गायन्ति प्रवचनं च वेदोपदेशकाः कुर्वन्ति ।
वेदिका-पितामहि !
(iv)...........................................................................................
पितामही-आम् पुत्रि ! यदा-कदा तत्र भजनोपदेशकाः अपि आगत्य भजनोपदेश -माध्यमेन स्व-उपदेशान् कुर्वन्ति।
वेदिका-(v)......................................................................................................
पितामही-आम् पुत्रि! त्वमपि आगामी रविवारे मया सह तत्र चल ।
वेदिका-आम् । पितामहि! अहम् अवश्यमेव तत्र चलिष्यामि ।

मञ्जूषा-
किं कदापि तत्र भजनोपदेशम् अपि भवति ।
आर्य समाज मन्दिरे के भजनं गायन्ति प्रवचनं च कुर्वन्ति ।
प्रतीयते यत् एषः वैदिकसत्संगः तु अतीव जीवनोपकारी भवति ।
पितामहि ! अद्य प्रातरेव भवती कुत्र गन्तुं सज्जिता अस्ति ।
तत्र रविवासरे किं किं भवति ।

अथवा

मव्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितां कथां पुनः लिखत -

पुरा अयोध्यायां (i)……….. नृपः आसीत्। तस्य चत्वारः पुत्राः आसन् रामः, लक्ष्मणः, भरतः शत्रुघ्न्नः च। तेषु चतुर्षु रामः (ii)………. आसीत्। चतुर्णामेव राजकुमाराणां मिथः प्रगाढः (iii)……… आसीत्। चतुरः एव पुत्रान् दृष्ट्वा दशरथः भृशं आगत्य प्रसीदति स्म। दशरथस्य तिस्रः (iv)……….. आसन्। तासु कौसल्या रामस्य जननी आसीत्। एकदा ऋषिः (v)………………. दशरथम् अवदत् - "वने राक्षसाः मम यज्ञं नाशयन्ति। यज्ञस्य (vi)…….. रामं लक्ष्मणं च इच्छामि।" दशरथस्य आज्ञया ऋषिः तौ अनयत्। तौ तत्र राक्षसान् नाशयित्वा यज्ञम् अरक्षतम्। रामस्य विवाहः (vii)……………. सह अभवत्। दशरथस्य आज्ञया सः वनम् अगच्छत्। सीता लक्ष्मणः च अपि तेन सह अगच्छताम्। तत्र रावणः सीताम् अहरत्। सुग्रीवस्य सहायतया रामः (viii)………… अनाशयत्। ततः सः अयोध्याम् आगच्छत्। (ix)………… रामस्य स्वागतम् अकरोत् तस्मै च राज्यम् अयच्छत्। रामं नृपं (x)……….. प्रजा प्रसन्ना अभवत्।
मञ्जूषा- रक्षायै, विश्वामित्रः, राज्यः, दशरथः, नेहः, ज्येष्ठः, सीतया, रावणम्, दृष्ट्वा, भरतः

| खण्ड: – 'ग' (अनुप्रयुक्त-व्याकरणम्)<br>(अंक : 25) | | |
|---|---|---|
| **5** | अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्ट्यम्)<br><br>(i) पुस्तकेऽस्मिन् कति पाठाः सन्ति?<br>(ii) एतत् + न उचितम्।<br>(iii) वाङ्मूला हि सरस्वती कथ्यते।<br>(iv) सर्वः + तरतु दुर्गाणि, सर्वः भद्राणि पश्यन्तु।<br>(v) तच्छलोकं श्रुत्वा सः प्रसन्नः भविष्यति। | **1x4=4** |
| **6** | अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत-(केवलं प्रश्नचतुष्ट्यम्)<br><br>(i) शुष्कः कण्ठः यस्य सः बाल: जलं पिबति।<br>(क) शुष्ककण्ठस्य<br>(ख) शुष्ककण्ठः<br>(ग) शुष्काकण्ठः<br>(घ) शुष्कं कण्ठम्<br><br>(ii) कार्यम् निर्विघ्नम् सम्पन्नं जातः।<br>(क) विघ्नानाम् अभावः<br>(ख) विघ्नात् अभाव<br>(ग) विघ्नस्य अभाव<br>(घ) विघ्नेनरहितम्<br>(iii) नारदव्यासौ द्रौणिं प्रतिवहतः।<br>(क) नारद: च व्यास: च<br>(ख) नारदौच व्यासौच<br>(ग) नारद व्यासः<br>(घ) नारदे च व्यासः च<br><br>(iv) ज्ञानवृद्धः पूज्य: भवति ।<br>(क) ज्ञाने वृद्धः<br>(ख) ज्ञानात् वृद्ध<br>(ग) ज्ञानस्य वृद्धः<br>(घ) ज्ञानेन वृद्धः<br><br>(v) मदोद्धताः कपय: यूथपतिं प्रहस्य अवदन्।<br>(क) मदस्य उद्धताः<br>(ख) मदेन उद्धताः<br>(ग) मठात् उद्धता:<br>(घ) मदाय उद्धताः | **1x4=4** |

| | | |
|---|---|---|
| 7 | अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्ट्यम्)<br><br>(i) संस्कृत विषये प्रभातस्य दक्ष + तल् प्रशंसनीया वर्तते।<br>(क) दक्षिता<br>(ख) दक्षीयता<br>(ग) दक्षता<br>(घ) दाक्षत्वम्<br><br>(ii) अस्य पुस्तकस्य घनत्वम् कियत् अस्ति?<br>(क) घन + त्व<br>(ख) घन + त्वम्<br>(ग) घन + तवतु<br>(घ) घन + तत्<br><br>(iii) पवित्र + टाप् यमुना प्रदूषिता न कर्तव्या।<br>(क) पवित्री<br>(ख) पवित्राः<br>(ग) पवित्रा<br>(घ) पवित्रतम्<br><br>(iv) अस्माकम् देश: शक्ति + मतुप् भवेत्।<br>(क) शक्तिमान्<br>(ख) शक्तिमतः<br>(ग) शक्तिमत्<br>(घ) शक्तिसम्पन्न:<br><br>(v) सा नर्तकी शोभनं नृत्यति।<br>(क) नर्तक + ङीप्<br>(ख) नृत् + ङीप्<br>(ग) नर्तक + डीप्<br>(घ) नर्तक + ङीष् | 1x4=4 |
| 8 | अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कृत्वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br><br>(i) विद्या विनयं ददाति।<br>(क) विद्यया विनयः दीयते।<br>(ख) विद्या विनयं दीयते।<br>(ग) विद्येषु विनयं दीयते। | 1x3=3 |

| | | |
|---|---|---|
| | (घ) विद्यया विनयं ददाति।<br><br>(ii) शिशुना पुस्तकं पठ्यते।<br>(क) शिशु पुस्तके पठति।<br>(ख) शिशुः पुस्तकं पठति।।<br>(ग) शिशु पुस्तक पठति।<br>(घ) शिशु: पुस्तकं पठन्ति।<br><br>(iii) सीतया गीतं गीयते।<br>(क) सीता गीत: गायति।<br>(ख) सीता गीता गायति।<br>(ग) सीता गीतं गायति।<br>(घ) सीतागीतानि गांयति।<br><br>(iv) वृक्षेण वर्धते।<br>(क) वृक्ष वर्धते।<br>(ख) वृक्षा वर्धते।<br>(ग) वृक्ष: वर्धते।<br>(घ) वृक्षण वर्धति। | |
| **9** | अधोलिखितदिनचर्यां रिक्तस्थानानि कालबोधकशब्दैः पूरयत। (केवलं प्रश्नत्रयम्)<br>(i) रामः प्रात: 5.30 ………. वादने उतिष्ठति ।<br>(ii) सः उत्थाय 5.45 ……….. वादने दन्तधावनम् करोति।<br>(iii) तत्पश्चात् 6.00 ……….. वादने व्यायामं करोति।<br>(iv) पुनः प्रात: 7:15 ……….. वादने स्नानं करोति।<br>(v) तत्पश्चात् 8:00 ………… वादने विद्यालयम् प्रति गच्छति। | **1x3=3** |
| **10** | मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितेषु वाक्येषु रिक्त स्थानानि पूरयत। (केवलं प्रश्नचतुष्ट्यम्)<br><br>मञ्जूषा- यत्र-तत्र, ह्यः, इतस्ततः, पुरा, विना<br><br>(i) उपवने जनाः ……….. भ्रमन्ति।<br>(ii) ………… अवकरं मा क्षिपय।<br>(iii) परिश्रमेण ………… कार्याणि न सिद्धयन्ति।<br>(iv) ………. अकबर: नाम नृपः आसीत्।<br>(v)…………..तत्र वृष्टिः अभवत्\| | **1x4=4** |
| **11** | अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति, शुद्धं पदं विकल्पेभ्यः चित्वा लिखत(केवलं प्रश्नत्रयम्) | **1x3=3** |

| | | |
|---|---|---|
| | (i) अहं पत्रवाहकः अस्ति।<br>(क) अस्मि<br>(ख) अस्तु<br>(ग) अस्वः<br>(घ) असि<br><br>(ii) वृक्षात् पत्राणि पततः।<br>(क) पतन्ति<br>(ख) पतसि<br>(ग) पततु<br>(घ) पतति<br><br>(iii) मृगः तत्र चरतः।<br>(क) मृगौ<br>(ख) मृगाः<br>(ग) मृगे<br>(घ) मृगम्<br><br>(iv) सीता रामः सह वनं गता।<br>(क) रामस्य<br>(ख) रामेण<br>(ग) रामे<br>(घ) रामम् | |
| | **रवण्ड: 'घ' (पठित-अवबोधनम्)**<br><br>**(अंक : 30)** | |
| **12** | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-<br><br>"भो! किमिदम् उच्यते ? न वयं तस्य वचनम् श्रुत्वा अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन् स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कपाय-कटु-रूक्षफलानि भक्षयिष्यामः ।" तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्ददम् उक्तवान् - रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि । " तुअथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति । तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः ।<br><br>(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)<br>(i) मदोद्धताः के आसन् ?<br>(ii) कः सगद्वम् उक्तवान् ?<br>(iii) वह्निज्वालाः कुत्र समुत्थिताः ? | **½ x2=1** |

| | | |
|---|---|---|
| | (आ) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)<br>(1) साधुनयनो यूथपतिः सगद्गदं किम् उक्तवान् ?<br>(ii) मेषः किमर्थं भूमौ लुठति ?<br>(iii) कीदृशः मेषः अश्वशालां प्रविशति ?<br>(इ) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)<br>(i) 'अवदन्' क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?<br>(ii) यूथपतिः' इति पदस्य किं विशेषणपदं प्रयुक्तम् ?<br>(iii)'त्यक्त्वा' इति अर्थे किम् पदम् अत्र गद्यांशे प्रयुक्तम्? | **1x2=2**<br><br><br><br><br>**1x2=2** |
| **13** | अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-<br><br>पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।<br><br>पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥<br><br>अ. एकपदेन उत्तरत -(केवलं प्रश्नद्वयम्)<br>(1) कः विद्याधनं यच्छति ?<br>(ii) पुत्राय बाल्ये किं यच्छति ?<br>(iii) कः तपस्तेपे ?<br>आ. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम्)<br>(i) पिता पुत्राय कीदृशं विद्याधनं यच्छति ?<br>(ii) पुत्राय कदा विद्याधनं यच्छति ?<br>(iii) का उत्क्तिः कृतज्ञता भवति ?<br>इ. निर्देशानुसारम् उत्तरत (केवलं प्रश्नद्वयम्)<br>(1) 'यच्छति' इति क्रियापदस्य कर्तृपदं किम् ?<br>(ii) 'विद्याधनं महत् ' इत्यनयोः विशेषणपदं किम् ?<br>(iii) 'स्वीकरोति' इत्यस्य विलोमपदं गद्यांश किं प्रयुक्तम् ? | **½ x2=1**<br><br><br>**1x2=2**<br><br><br>**1x2=2** |
| **14** | अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत<br>राजहंसः - अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुलीक्रियते?<br>राजहंसी -भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम् । मेध्यम् अमेध्यं सर्वमेव भक्षयति । कर्णकटुशब्दैः...<br>काकः - (प्रविश्य, सक्रोधम्) आः किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे! अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'काका' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।<br>अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कैः वातावरणम् आकुलीक्रियते?<br>(ii) कः अतीव कर्तव्यपरायणः?<br>(iii) श्रीरामस्य वर्णः कीदृशः?<br>आ. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम्)<br>(i) काकः प्रभाते किं करोमि इति वदति?<br>(ii) काकः किं भक्षयति?<br>(iii) राजहंसः कुत्र विहरति? | **½ x2=1**<br><br><br><br><br><br>**1x2=2** |

| | | |
|---|---|---|
| | इ. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) 'श्रीकृष्णस्य' इत्यर्थे नाठ्यांशे किं पदं प्रयुक्तम्?<br>(ii) 'काकात् अन्यः को भवितुमर्हति? वाक्येऽस्मिन् क्रियापदं किम् ?<br>(iii) 'कृष्णम्' इति पदस्य विशेष्यपदं किम्? | **1x2=2** |
| **15** | . रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं पञ्चप्रश्ना:)<br><br>1) मयूरस्य नृत्यं <u>प्रकृते:</u> आराधना।<br>2) <u>पिता</u> पुत्राय तपः तपति।<br>3) राजा <u>वैद्यान्</u> आहूय अश्वरक्षार्थम् अपृच्छत् ।<br>4) राजा पुत्रवत् <u>प्रजा:</u> पालयति स्म ।<br>5) राजा <u>याचकेभ्यः</u> दानं ददाति स्म ।<br><u>6) कामः</u> ज्ञानस्य विज्ञानस्य च नाशं करोति \| | **1x5=5** |
| **16** | मञ्जूषातः समुचित पदानि चित्वा – अधोलिखितश्लोकस्यः अन्वयं पूरयत<br><br>अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।<br><br>अनिच्छन्नपि वाष्र्णेया बलादिव नियोजितः ॥<br><br>मञ्जूषा- पापम्, अयम्, बलात्, प्रयुक्त:<br>अन्वयः - वाष्र्णेयः अथ (i)................पूरुषः केन (ii)..............अनिच्छन् अपि (iii).............नियोजितः इव (iv)..............चरति ।<br><br>अथवा<br>मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत।<br><br>त्यक्त्वा धर्मप्रदां वाच परुषा योऽभ्युदीरयेत् ।<br>परित्यज्य पक्वं फलं भुङ्क्तेऽपक्वं विमूढधीः ॥<br>भावार्थः - यः जनः धर्मनिष्ठां वाणीं (i)............कठिनानि वचनानि वदति, सः (ii)............ पक्वं फलं त्यक्त्वा अपक्वं (iii)................. खादति। अतः मनुष्यः सर्वदा जीवने (iv).........प्रियवचनानि च वदेत्।<br><br>मञ्जूषा- सत्यवचनानि, त्यक्त्वा, फलं, मूर्खः | **½x4=2** |
| **17** | अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत (केवलं प्रश्नचतुष्टयम्)<br><br>(i) राज्ञः दानशीलताम् <u>आकर्ण्य</u> जनाः तं देशम् आयान्ति स्म। | **1x4=4** |

| | | |
|---|---|---|
| | (क) मत्वा ख) कृत्वा (ग) प्राप्य (घ) श्रुत्वा<br><br>(ii) आचार्यात् <u>पादम्</u> आदत्ते।<br><br>(क) चतुर्थांशम् (ख) श्लोकपङ्क्तिम् (ग) पदम् (घ) चरणम्<br><br>(iii) तदेव आहुः महात्मानः समत्वमिति तथ्यतः ।<br><br>(क) शृण्वन्ति (ख) चिन्तयन्ति (ग) कथयन्ति (घ) पश्यन्ति<br><br>(iv) भवतां <u>जिज्ञासां</u> शमयितुम् इच्छामि।<br><br>(क) गन्तुम् इच्छा (ख) ज्ञातुम् इच्छा (ग) पठितुम् इच्छा (घ) कर्तुम् इच्छा<br><br>(v) तस्मात् त्वम् <u>आदौ</u> इन्द्रियाणि नियम्य पाप्मानं प्रजहि।<br><br>(क) सर्वप्रथमम् (ख) कानिचित् (ग) अस्कस्मात् (घ) कदाचित् | |
| **18** | . मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत -<br><br>एकदा बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः (i)…….. राजा बभूव । सः नगरस्य समन्ततः धनधान्यसमृद्धाः (ii)……... अकारयत् । राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि (iii)……... तं देशम् आयान्ति स्म। तस्य दानशीलतां परीक्षितुं शक्रः (iv)….. रूप धारयित्वा आगच्छत् नेत्रदानाय च अपृच्छत् । राज्ञः नेत्रदानार्थ निश्चयं ज्ञात्वा मन्त्रिणः (v)…….. अभवन् । राजा वैद्योक्तविधिना स्वचक्षुः (vi)…….. समर्पितवान्। देवराजः शक्रः तस्य (vii)…….. प्राशंसत् \|शक्रस्य प्रभावेन आत्मनः (viii)………. च राजा पुनः द्रष्टुं समर्थः अभवत् ।<br><br>मञ्जूषा- दानशालाः, जनाः, विषण्णाः, सत्यपुण्यबलेन, शिवीनां,याचकाय, त्यागवृत्तिं, नेत्रहीनयाचकस्य | **½x8=4** |